# Nrisimhanavaratna Stava

# नृसिंहनवरत्नस्तवः

## Document Information

Text title : Nrisimhanavaratna Stava

File name : nRRisiMhanavaratnastavaH.itx

Category : vishhnu, nava, dashAvatAra, shrIkRiShNalIlAshukamuni

Location : doc_vishhnu

Author : Shrikrishnalilashukamuni

Proofread by : Mohan Chettoor

Description/comments : From Stotras Samahara Part 1 (ed. K.Raghavan Pillai)

Latest update : September 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2022

*sanskritdocuments.org*

# नृसिंहनवरत्नस्तवः

श्रीकृष्णलीला शुकमुनि विरचितः ।
उग्रं वीरमुदुन्मदिष्णुषु महाविष्णुं ज्वलन्तं ज्वल-
द्र्वं गर्विषु सर्वतोमुखमसुध्वंस नृसिंहं द्रुहः
अग्र्यं भीषणमद्भुताद्भुततमं भद्रं भवध्वंसिन (भवध्वंसनं)
मृत्युं मृत्युषु मृत्युमृत्युममृतं सोऽहं नमाम्यन्वहम् ॥ १॥ (तत्त्वं मृत्युषु)

कौमोदक्यां कुमार्यां किमिह बहुमतिर्नन्दकः कन्दुखान-
चक्रं धिक्कारभूमिर्जगति सुविदिता शृङ्गवच्छार्ङ्गशक्तिः ।
शूलं तूलास्थि पाशः पशुषु विषहतां सैव वज्रेऽप्यवज्ञे-
त्युद्रिक्तं दैत्यमुच्चैर्दहति नखमुखे त्वां निदध्यान्नृसिंहः ॥ २॥ (निधत्तान्नृसिंहः)

माणिक्यस्तम्भगर्भे मुहुमुहुमुहिति प्राक्क्षणे प्रेक्ष्यमाणः (प्राङ्कणे)
पश्चादेतत्पुरस्ताद् भुगुभुगुभुगिति स्फूर्जितौर्जित्य वह्निः ।
प्रारब्धक्रोधभारं भुरभुरभुरिति भ्रान्तकान्तिः परस्तात् (भुरुभुरुभुरिति)
पश्चान्निश्चूर्णितारिस्फुडुफुडुफुडिति त्वां निदध्यान्नृसिंहः ॥ ३॥

निर्भिण्णस्तम्भगर्भान्नभसि परिपतन्नुत्पतन् निष्पतन् द्राग्
दैत्येन्द्रोद्रिक्तवक्षस्तटखनननखः प्रौढगाढाट्टहासः । (प्रौढिगाढाट्टहासम्)
तद्रक्तोद्रिक्तधाराधुरुधुरुधुरिति ध्वाननिर्धूतधैयं
निर्घुष्टोद्धट्टनोद्यद्द्रुतनटनसटस्त्वां निपिंष्टान्नृसिंहः ॥ ४॥

उग्रः खड्गाग्रकोटीखरनखरमुखक्षुण्णदैत्येन्द्रवक्षः-
पीठप्रौढप्रलोठत्पृथुलफणिफणाभीषणस्फीतपाणिः ।
वीरक्रूरप्रभावप्रतिहासितजरत्कल्पकल्पान्तरुद्र-
क्रीडावीळार्हकेळीभ्रमितभुवनदृक् त्वां निकृन्तान्नृसिंहः ॥ ५॥

उ द्भ्राम्यद्भद्रकाळीनिनदमुरुमहाभैरवारावगर्भं
विभ्राम्यद्वीरभद्रद्रुतगतिबहलोद्रिक्तनृत्तान्तरुद्रम् । (नृत्ताद्रिरुद्रम्)
प्रभ्राम्यत्पाञ्चजन्यप्रतिरवभरितप्रौढिमुद्राद्रिकुञ्जं

विभ्राम्यद्वीरसिंहध्वनिधुतगगनं त्वां निरुन्ध्यान्नृसिंहः ॥ ६॥

(अतः परं अन्य हस्तलिखिते पद्यमिदमधिकतया दृश्यते-
घोरव्याघूर्णवीरभ्रमिततरतरत्तारकादीप्तदृष्टि-
दंष्टान्निर्दष्टसृक्कस्थपुटमुखपुटाटपोविभ्रान्तजिह्वः ।
नीरन्ध्रध्वानधाराभरभरितहरिद्रन्ध्ररुद्धाट्टहासः
संहृष्टभ्रूसटोग्रभ्रुकुटिभृशपटुर्भर्जतु त्वां नृसिंहः ॥

पुष्टोद्घुष्टाट्टहासस्फुटपटिमभरप्रस्फुरद्ब्रह्मबिम्बं (पुष्टोत्पुष्टट्टहास)
क्षुभ्यद्ब्रह्माण्ड खण्डक्षुभितघुमुघुमृद्घूर्णनानार्णवौघम् । (भाण्डक्षुभित)
विभ्यद्विभ्रश्यदभ्रभ्रमणघणघणक्रुष्टनक्षत्रलक्ष
प्रक्षोदक्षोदशोभोद्भटभुवनमभिद्रुह्यतु त्वां नृसिंहः ॥ ७॥

क्षुभ्नीयात् त्वां नृसिंहो घहघहघहिति क्रोधघुष्टाट्टहासै-
रुत्कृन्तात् त्वां नृसिंहः कटकटकटिति क्रुष्टदंष्ट्रोग्रदन्तैः ।
उद्धूयात् त्वां नृसिंहो घटघटघटिति प्रोद्धतोद्यत्सटाभि-
निर्दह्यात् त्वां नृसिंहो धुरुधुरुधुरिति प्रस्फुरद्विष्फुलिङ्गैः ॥ ८॥ (भुरुभुरुभुरिति)

स्तम्भं दैत्येन्द्रवक्षःस्थलमपि युगपत् पाटयन् पाटलाभै- (वक्षस्तटमपि)
रम्भोभिः सान्द्रसिक्तद्रवविभव मयैस्तर्पयंस्तत्पितॄंश्च ।
जम्भारातीभकुम्भस्थलदलनभयत्रस्तगीर्वाणसेना-
गम्भीरस्तोत्रधारापरिमलहृषितो भर्जतु त्वां नृसिंहः ॥ ९॥

अहङ्कारग्रन्थेरिति दलनमन्त्राणि पठतां (ग्रन्धरिति)
त्रिसन्ध्यं सन्ध्यायेत् त्रिजगदधिदैवं नरहरिम् ।
अभङ्गानातङ्कानपि सपदि जित्वा निजरिपू-
नवन्ध्यैरैश्वर्यैरभिमतजयश्रीर्विजयते ॥ १०॥

अमुना मनुनाशु कृष्णलीलाशुकयोगीन्द्रमुनीन्द्रगुम्भितेन ।
वहतां पठतां जयं जयश्रीर्नरसिंहं नवरत्नमण्डलेन ॥ ११॥ (भजतां वहतां जयं)

वीरश्रोत्ररसायनैस्त्रिभुवनप्रौढैरमीभिः स्तवै-
र्वीरश्रीनरसिंहपादकमलद्वन्द्वं मुहुः प्रीयताम् ।
आरब्धाभिनवप्रमोदलहरीभारस्फुरान्निस्सर-
नीरन्ध्रस्थितरोमहर्षभरितं नृत्यन्तु वागीश्वराः ॥ १२॥

(नृसिंहनवरत्नत्तनामकोऽयं स्तवः श्रीकृष्णलीलाशुकमुनि-विरचित

इति एतदुपान्तिमाद् “अमुना मनुने” त्यादिपद्यादवगम्यते ।)

इति श्रीकृष्णलीलाशुकमुनिविरचितः नृसिंहनवरत्नस्तवः सम्पूर्णः ।

Proofread by Mohan Chettoor

*Nrisimhanavaratna Stava*

pdf was typeset on September 4, 2022

Please send corrections to *sanskrit@cheerful.com*